श्री मातंगी हृदयं

श्री मातंगी हृदयं

एकदा कौतुकाविष्टा भैरवं भूतसेवितं |
भैरवी परिपप्रच्छ सर्वभूतहिते रता || 1 ||

श्रीभैरव्युवाच |
भगवन् सर्वधर्मज्ञ भूतवात्सल्यभावन |
अहं तु वेत्तुमिच्छामि सर्वभूतोपकारं || 2 ||

केन मंत्रेण जप्तेन स्तोत्रेण पठितेन च |
सर्वथा श्रेयसां प्राप्तिर्भूतानां भूतिमिच्छतां || 3 ||

श्रीभैरव उवाच |
शृणु देवि तव स्नेहात्प्रायो गोप्यमपि प्रिये |
कथयिष्यामि तत्सर्वं सुखसंपत्करं शुभं || 4 ||

पठतां शृण्वतां नित्यं सर्वसंपत्तिदायकं |
विद्यैश्वर्यसुखावाप्ति मंगळप्रदमुत्तमं || 5 ||

मातंग्या हृदयं स्तोत्रं दुःखदारिद्र्यभंजनं |
मंगळं मंगळानां च ह्यस्ति सर्वसुखप्रदं || 6 ||

अस्य श्रीमातंगी हृदयस्तोत्र मंत्रस्य दक्षिणामूर्तिर्ऋषिः विराट् छंदः मातंगी देवता ह्रीं बीजं हूं शक्तिः क्लीं कीलकं सर्ववांछितार्थसिद्ध्यर्थे पाठे विनियोगः ||

ऋष्यादिन्यासः –
ॐ दक्षिणामूर्तिर्ऋषये नमः शिरसि | विराट्छंदसे नमो मुखे | मातंगीदेवतायै नमः हृदि | ह्रीं बीजाय नमः गुह्ये | हूं शक्तये नमः पादयोः | क्लीं कीलकाय नमो नाभौ | विनियोगाय नमः सर्वांगे ||

करन्यासः –
ॐ ह्रीं अंगुष्ठाभ्यां नमः | ॐ क्लीं तर्जनीभ्यां नमः | ॐ हूं मध्यमाभ्यां नमः | ॐ ह्रीं अनामिकाभ्यां नमः | ॐ क्लीं कनिष्ठिकाभ्यां नमः | ॐ हूं करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः –

ॐ ह्रीं हृदयाय नमः | ॐ क्लीं शिरसे स्वाहा | ॐ हूं शिखायै वषट् | ॐ ह्रीं नेत्रत्रयाय वौषट् | ॐ क्लीं कवचाय हुं | ॐ हूं अस्त्राय फट् |

ध्यानं |

श्यामां शुभ्रांशुभालां त्रिकमलनयनां रत्नसिंहासनस्थां
भक्ताभीष्टप्रदात्रीं सुरनिकरकरासेव्यकंजांघ्रियुग्मां |
नीलांभोजांशुकांतिं निशिचरनिकरारण्यदावाग्निरूपां
मातंगीमावहंतीमभिमतफलदां मोदिनीं चिंतयामि || 7 ||

नमस्ते मातंग्यै मृदुमुदिततन्वै तनुमतां
परश्रेयोदायै कमलचरणध्यानमनसां |
सदा संसेव्यायै सदसि विबुधैर्दिव्यधिषणै-
-र्दयार्द्रायै देव्यै दुरितदलनोद्दंडमनसे || 8 ||

परं मातस्ते यो जपति मनुमव्यग्रहृदयः
कवित्वं कल्पानां कलयति सुकल्पः प्रतिपदं |
अपि प्रायो रम्याऽमृतमयपदा तस्य ललिता
नटीं मन्या वाणी नटति रसनायां च फलिता || 9 ||

तव ध्यायंतो ये वपुरनुजपंति प्रवलितं
सदा मंत्रं मातर्नहि भवति तेषां परिभवः |
कदंबानां मालाः शिरसि युंजंति सदये
भवंति प्रायस्ते युवतिजनयूथस्ववशगाः || 10 ||

सरोजैः साहस्रैः सरसिजपदद्वंद्वमपि ये
सहस्रं नामोक्त्वा तदपि तव डेंतं मनुमितं |
पृथङ्नाम्ना तेनायुतकलितमर्चंति खलु ते
सदा देवव्रातप्रणमितपदांभोजयुगळाः || 11 ||

तव प्रीत्यै मातर्ददति बलिमाधाय बलिना
समत्स्यं मांसं वा सुरुचिरसितं राजरुचितं |
सुपुण्या ये स्वांतस्तव चरणमोदैकरसिका
अहो भाग्यं तेषां त्रिभुवनमलं वश्यमखिलं || 12 ||

लसल्लोलश्रोत्राभरणकिरणक्रांतिकलितं
[मितस्मित्यापन्नप्रतिभितममन्नं विकरितं]
मितस्मेरज्योत्स्नाप्रतिफलितभाभिर्विकरितं |
मुखांभोजं मातस्तव परिलुठद्भ्रूमधुकरं
रमा ये ध्यायंति त्यजति न हि तेषां सुभवनं || 13 ||

परः श्रीमातंग्या जपति हृदयाख्यः सुमनसा-
-मयं सेव्यः सद्योऽभिमतफलदश्चातिललितः |
नरा ये शृण्वंति स्तवमपि पठंतीममनिशं
न तेषां दुष्प्राप्यं जगति यदलभ्यं दिविषदां || 14 ||

धनार्थी धनमाप्नोति दारार्थी सुंदरीं प्रियां |
सुतार्थी लभते पुत्रं स्तवस्यास्य प्रकीर्तनात् || 15 ||

विद्यार्थी लभते विद्यां विविधां विभवप्रदां |
जयार्थी पठनादस्य जयं प्राप्नोति निश्चितं || 16 ||

नष्टराज्यो लभेद्राज्यं सर्वसंपत्समाश्रितं |
कुबेरसमसंपत्तिः स भवेद्धृदयं पठन् || 17 ||

किमत्र बहुनोक्तेन यद्यदिच्छति मानवः |
मातंगीहृदयस्तोत्रपाठात्तत्सर्वमाप्नुयात् || 18 ||

इति श्रीदक्षिणामूर्तिसंहितायां श्री मातंगी हृदय स्तोत्रं |